|| श्री गणेशाय नमः ||

# हरी ॐ धार्मिक पूजा विधी केंद्र

ज्योतिष आणि वास्तु सल्लागार

Astro • Puja • Vastu

## पुरुष सूक्तम

सहस्त्रशीर्षा पुरुष:सहस्राक्ष:सहस्रपात् । स भूमि सर्वत: स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ।।1।।

पुरुषऽएवेदं सर्व यद्भूतं यच्च भाव्यम् । उतामृतत्यस्येशानो यदन्नेनातिरोहति ।।2।।

एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।3।।

त्रिपादूर्ध्व उदैत्पुरुष:पादोऽस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ।।4।।

ततो विराडजायत विराजोऽअधि पूरुषः । स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुर: ।।5।।

तस्माद्यज्ञात्सर्वहुत: सम्भृतं पृषदाज्यम् । पशूंस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।।6।।

तस्माद्यज्ञात् सर्वहुतऽऋचः सामानि जज्ञिरे । छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।7।।

तस्मादश्वाऽअजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ।।8।।

तं यज्ञं बर्हिषि प्रौक्षन् पूरुषं जातमग्रत: । तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ।।9।।

यत्पुरुषं व्यदधु: कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किं बाहू किमूरू पादाऽउच्येते ।।10।।

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य: कृत: । ऊरू तदस्य यद्वैश्य: पद्भ्या शूद्रोऽअजायत ।।11।।

चन्द्रमा मनसो जातश्चक्षो: सूर्यो अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।12।।

नाभ्याऽआसीदन्तरिक्ष शीर्ष्णो द्यौः समवर्त्तत । पद्भ्यां भूमिर्दिश: श्रोत्रात्तथा लोकांर्ऽअकल्पयन् ।।13।।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइध्म: शरद्धवि: ।।14।।

सप्तास्यासन् परिधयस्त्रि: सप्त: समिध: कृता:। देवा यद्यज्ञं तन्वानाऽअबध्नन् पुरुषं पशुम् ।।15।।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमान: सचन्त यत्र पूर्वे साध्या: सन्ति देवा: ।।16।।


## HARI OM DHARMIK PUJA VIDHI KENDRA

योगेशशास्त्री ढवळे (गुरुजी) : 95944 28749 | निलेशशास्त्री ढवळे (गुरुजी) : 86524 02078

**SANPADA OFFICE**
Office No.8, 1st Flr, Shiva Triveni Galleria CHS.,
Plot No. 13, Sector 8, Sanpada, Navi Mumbai

**GOVANDI OFFICE**
Shri Swaybhu Hanuman Mandir, Deonar
Mahanagarpalika Vasahat, Govandi, Mumbai.

hariom astrologers | hariom astrologers | hariom_astrologers

hariomastrologers@gmail.com | www.hariomastrologers.com